Click here to go back

Shukra kavacham - Gujarati




## અથ શુક્ર કવચં

ઓં અસ્ય શ્રી શુક્ર કવચ મહામંત્રસ્ય ભારદ્વાજ ઋષિઃ| અનુષ્ટુપ્છંદઃ| ભગવાન્ શુક્રો દેવતા| હ્રાં બીજં| હ્રીં શક્તિઃ| હ્રૂં કીલકં| મમ શુક્ર ગ્રહપ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગઃ|| (કરન્યાસઃ) ભાં અંગુષ્ઠાભ્યાં નમઃ| ભીં તર્જનીભ્યાં નમઃ| ભૂં મધ્યમાભ્યાં નમઃ| ભૈં અનામિકાભ્યાં નમઃ| ભૌં કનિષ્ઠિકાભ્યાં નમઃ| ભઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ|| (અંગન્યાસઃ) ભાં હૃદયાય નમઃ| ભીં શિરસે સ્વાહા| ભૂં શિખાયૈ વષટ્| ભૈં કવચાય હું| ભૌં નેત્રત્રયાય વૌષટ્| ભઃ અસ્ત્રાય ફટ્| ભૂર્ભુવસ્સુવરોમિતિ દિગ્ભંધઃ|| (ધ્યાનં) શુક્રં ચતુર્ભુજં દેવં અક્ષમાલા કમંડલં| દંડહસ્તં ચ વરદં ધ્યુતિજાલસુ શોભિતં|| શુક્લાંબરધરં પૂજ્યં શુક્લગંધાનુલેપનં| વજ્રાભરણસંયુક્તં ચૈવ કિરીટમકુટોજ્વલં|| શ્વેતાશ્વરથારૂઢં મેરું ચૈવ પ્રદક્ષિણં| મૃણાળકુંદેંદુપયો હિમપ્રભં પીતાંબરં સ્નિગ્ધવક્ષમાલિનં| સમસ્ત શાસ્ત્ર શૃતિ તત્વદર્શનં દ્યાયેત્કવિં વાંભિતવસ્તુસિદ્ધયે|| (અથ કવચં) શિરો મે ભાર્ગવઃ પાતુ પાલં પાતુ ગ્રહાધિપઃ| નેત્રે દૈત્યગુરુઃ પાતુ શ્રોત્રે શ્રીચંદનદ્યુતિઃ|| પાતુ મે નાસિકાં કાવ્યો વદનં દૈત્યવંદિતઃ| રસનામ શનાપાતુ કર્ણં શ્રિકંઠભક્તિમાન્|| ભુજૌ તેજોનિધિ પાતુ વક્ષો યોગવિદાં વરઃ| અક્ષમાલાધરો રક્ષેત્કુક્ષિ મે ચ કૃપાકરઃ|| કટિં મે પાતુ વિશ્વાત્મા ઊરૂ મે સુરપૂજિતઃ| જાનુની તં ભૃગુઃ પાતુ જંઘે મે દેવતાચરઃ|| ગુલ્ફૌ ગુણાનિધિઃ પાતુ પાદૌ મે પાંડરાંબરઃ| સર્વાણ્યંગાનિ મે પાતુ શુક્રઃ કવિર્હર્નિશં| (ફલશ્રુતિઃ) ય ઇદં કવચં દિવ્યં પઠેત્ શ્રદ્ધા સમન્વિતઃ| ન તસ્ય જાયતે પીડા ભાર્ગવસ્ય પ્રસાદતઃ|| ઇતિ સ્કાંદ પુરાણે શંકર સંહિતાયાં શુક્ર કવચં||

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back